# .. jaganma NgalAstotram ..

# ॥ જગન્મઙ્ગલાસ્તોત્રમ્ ॥

## Document Information

```
Text title : jaganmangalastotram
File name : jaganmangalastotram.itx
Location : doc_devii
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Ramgopal Bhimavarapu bhimavarapu2014 at gmail.com.
Sunder Hattangadi
Proofread by : Sunder Hattangadi sunderh at hotmail Ramgopal Bhi-
mavarapu
Latest update : July 19, 2015
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ જગન્મઙ્ગલાસ્તોત્રમ્ ॥

વીણાવાદનતત્પરાઙ્ગુલિ નદલ્લોલાઞ્ચિતૈઃ કિઙ્કિણી-
જાલૈઃ શોભિતકઙ્કણે શશિમુખે બાલેન્દુચૂડામણે ।
હેલારાજિતચારુનેત્રયુગલે ગ્રૈવેયશોભાઞ્ચિતે
બાલે પાલય પાપસંહતિતમસ્તારે જગન્મઙ્ગલે ॥ ૧॥
કુક્ષૌ તે બહુજીવલોકસમિતેઃ કોચિં ચિરં બિભ્રતી
કલ્પાદૌ ત્રિપુરે સૃજસ્યવસિ તાન્ સર્વાસ્વવસ્થાસ્વહો ।
અન્તે તાનખિલાન્વિનાશયસિ સર્વં ભો વિલાસસ્તવ
બાલે પાલય પાપસંહતિતમસ્તારે જગન્મઙ્ગલે ॥ ૨॥
લોકે નીરધરાગ્નિવાયુગગનાઃ સર્વે ભવલ્લીલયા
માતઃ સઞ્ચલિતા હિ તારકગણાઃ સૂર્યાદિસર્વે ગ્રહાઃ ।
સર્વં ખલ્વિહ તે સ્વરૂપમપિ ચ ત્વં ચોદયિત્રી સદા
બાલે પાલય પાપસંહતિતમસ્તારે જગન્મઙ્ગલે ॥ ૩॥
માયામેયવિકાસમાત્રવિભવા માતસ્તવેયં કૃતિ-
ર્ગેયા સર્વગુણાન્વિતા ચ બહુધા મેયાપિ વેદ્યા નહિ ।
ધ્યેયા જ્ઞાનવિશારદૈશ્ચ વિવિધૈઃ શાસ્ત્રૈર્વિલોક્યાપિ વૈ
બાલે પાલય પાપસંહતિતમસ્તારે જગન્મઙ્ગલે ॥ ૪॥
નેત્રૈઃ શ્વેતવિનીલશોણરુચિભિઃ પૂર્ણાનુકમ્પાન્વિતૈઃ
પાપાનાં મમ ભઞ્જનાય ગિરિજે પૂરત્રયાણામિવ ।
તીર્થાનામુપસઙ્ગમસ્ય નયસીત્યેતદ્ધ્રુવં માં તથા
બાલે પાલય પાપસંહતિતમસ્તારે જગન્મઙ્ગલે ॥ ૫॥
માતસ્તે દરલોલશીતવિમલૈર્નેત્રૈઃ શિવે પશ્ય માં
દુઃખાત્યન્તવિપાકદીનવદનં શીઘ્રં દયાર્દ્રૈર્યતઃ ।
ગ્રામે વા વિપિનેઽપિ વા હિમકરો જ્યોત્સ્નાનિપાતૈઃ સમં
બાલે પાલય પાપસંહતિતમસ્તારે જગન્મઙ્ગલે ॥ ૬॥
વેદાનાં શિખરાણિ પાદયુગલી ધત્તે તવામ્બાન્વહં
પાદ્યં તદ્ધરમૌલિજૂટતટિનીલાક્ષાઙ્કિતો રાગિમા ।
શ્રીવિષ્ણોર્હિ કિરીટરત્નસુષમા યસ્યાસ્તુ વન્દેતરાં
બાલે પાલય પાપસંહતિતમસ્તારે જગન્મઙ્ગલે ॥ ૭॥
યા શમ્ભોશ્ચરિતામૃતેન ચલિતા રોષા ચ ગઙ્ગાહૃદે
યા સખ્યાં પરમાદરા શિવગલે યા સઙ્ગતા સર્વદા ।
દૃષ્ટ્યા તે શશિશીતયા ચ દિશતી સન્મઙ્ગલં સન્તતં
બાલે પાલય પાપસંહતિતમસ્તારે જગન્મઙ્ગલે ॥ ૮॥
વાગ્દેવીં ચતુરાનનસ્ય ગૃહિણીમાહુર્વિધિજ્ઞા નરાઃ

શ્રીવિષ્ણોર્ગૃહિણીં સુધાબ્ધિતનયાં શ્રીકણ્ઠપત્નીમુમામ્ ।
માતઃ કા ભવતી વિલાસચતુરા માયા પરા દેવતા
બાલે પાલય પાપસંહતિતમસ્તારે જગન્મઙ્ગલે ॥ ૯॥
ઇતિ શ્રીજગન્મઙ્ગલાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Ramgopal Bhimavarapu bhimavarapu2014 at gmail.com
and Sunder Hattangadi sunderh at hotmail.com

.. jaganma NgalAstotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*